**अशिर** पु० अश—इरच्। १राक्षसे २अग्नौ तस्य सर्व्व भक्षत्वात्तथात्वम् ३भास्करे ४वायौ च तयोर्व्यापकत्वात्तथात्वम् ५हीरके ६नार्य्यां स्त्री टाप्।

**अशिरस्** पु॰ नास्ति शिरोऽस्य। १कबन्धे २अग्रशून्ये त्रि०।

**अशिरस्स्नान** न० न शिरसा स्नानम्। शिरोमज्जनशून्ये स्नाने।

**अशिव** न० विरोधे न०त०। १मङ्गलभिन्ने २तद्वति त्रि० ३उग्रे च पु०व०। ४अमङ्गलशब्दोक्ते तत्सूचके त्रि०।

**अशिशिषा** स्त्री अशितुमिच्छा अश—सन्—भावे अ। भोजनेच्छायाम् "दृश्यते ह्युत्क्रान्तौ प्राणस्याशिशिषाऽतो व्याददातीति" छा०उ०भा०।

**अशिशु** पु० विरोधे न०त०। १शिशुभिन्ने तरुणे "जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः" इति स्मृत्युक्तवयोऽतिक्रान्ते २नववर्षवयस्के च। नास्ति शिशुर्यस्य। ३शिशुशून्ये त्रि०। स्त्रियां ङीप् लोके, वेदेऽपि क्वचित् "आ धेनवो धुनयन्तामशिश्वीः" ऋ० ३,५५,१६। "नो मा कुलानोष्टहेभ्यो धेनवोऽयुःसनाभुजो अशिश्वीः" ऋ०१,१२०,८।

**अशिष्ट** त्रि० न०त०। १उपदिष्टभिन्ने यस्य शासनं न कृतं तस्मिन्। शिष्टः साधुः विरोधे न०त०। २असाधौ साधुत्वञ्च वेदार्थे विश्वासवत्त्वमिति दिनकरी ३तद्भिन्ने नास्तिके ४वर्णसङ्करकारके व्यभिचारवति च "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" वार्त्ति०।

**अशिष्ठ** त्रि०अश्नाति अश—अच् अतिशायने इष्ठन्। १भोक्तृतमे २अग्नौ पु०तस्य सर्व्वभक्षकत्वात्तथात्वम्। "अशीतमेत्यशिष्ठो ह्यग्निः" शत०ब्रा०।

**अशीत** न० विरोधे न० त०। १उष्णस्पर्शे २तद्वति त्रि०। शीतं हिमं तद्बाधा न०ब०। हिमबाधाशून्ये त्रि० "अशीतास्तरवोमाघे" नीतिः। [अशीतकिरणादयोऽप्यत्र।

**अशीतकर** पु० अशीत उष्णः करो यस्य। उष्णांशौ सूर्य्ये

**अशीतम** पु० अश्नाति अश—बा०इनि ततः तमप् वेदे दीर्घः। भोक्तृतमे अग्नौ "अशीतमेत्यशिष्ठो ह्यग्निः" शत०ब्रा०।

**अशीति** स्त्री दशानामवयवं दशतिः दशकम् अष्टगुणिता दशतिः नि०अशीत्यादेशः। अष्टगुणिते दशके (आशी) १संख्याभेदे, २तत्संख्यान्विते च। "अशीतिभागो वृद्धिः स्यान्मासिमासि सबन्धके" या०स्मृ०। अर्वागष्टादशवर्षीयादशीतेरूर्द्ध्वमेव च" स्मृतिः अशीतिः परिमाणमस्य ठन्। अशीतिकः" तत्परिमिते त्रि०।

**अशीर्षिक** त्रि० नास्ति शीर्षा यस्य व्रीह्यादि० ठन्। अशीर्षवति १मस्तकशून्ये २अग्रशून्ये च।

**अशील** न० विरोधे न०त०।१दुष्टशीले न०त०२शीलशून्ये त्रि०

**अशुच्** त्रि० नास्ति शुगस्य। शोकशून्ये।

**अशुचि** त्रि० विरोधे न०त०। १शौचशून्ये २अपवित्रे मूत्रादौ च। स्त्रियां ङीप्। "अशुच्योनैव तास्तेन येन वैकारिकं हि तत्" शङ्खः। शुचितत्कालजीविनां कर्म्माविकारित्वेनाशुचेः पर्य्युदस्तत्वम् "अशुचिद्रव्याणि च अशुद्धिशब्दे वक्ष्यन्ते" व्रतानामुपवासानां श्राद्धादीनाञ्च सङ्गमे। करोति यः क्षौरकर्म सोऽशुचिः सर्वकर्मसु" स्मृतिः "त्रिरात्रमशुचिर्भवेत्" स्मृतिः। अशुचित्वं च वैदिककर्म्मानर्हत्वप्रयोजकोधर्म्मविशेषः तच्च कर्त्तृनिष्ठं द्रव्यनिष्ठञ्च। सूतकनिमित्तं दुष्टद्रव्यसंसर्गकृतञ्च कर्त्तृनिष्ठम्। द्रव्यनिष्ठन्तु वस्तुस्वभावकृतम् "यथा मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्। नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेदित्यादि स्मृत्युक्तं तत्संसर्गयुतद्रव्यनिष्ठञ्च अधिकमशुद्धिशब्दे वक्ष्यते। शुचिः शुभ्रः। तद्भिन्ने ३कृष्णवर्णे पु० ४तद्वति त्रि० स्त्रियां वा ङीप्। तस्य भावः अण् अशौचम् ष्यञ् आशौच्यम्। अशुचिभावे न० "आशौच्यात् विप्रमुच्येत ब्राह्मणान् स्वस्तिवाच्य च" स्मृतिः वा पूर्व्वपदवृद्धिः अशौच्यमपि तत्रैव। अशुचौ भवः ष्यञ् वा पूर्व्वपदःदीर्घ अ(आ)शौच्यः तद्भवे त्रि०।

**अशुद्ध** त्रि० विरोधे न०त०। १शुद्धभिन्ने सदोषे २अपवित्रे च दोषश्च नानाविधः व्याकरणादिलक्षणाननुसारित्वे शब्दस्य दोषः शास्त्रनिषिद्धतयाऽनुष्ठाने कर्म्मणां दोषः यथा हिंसादेः पापजनकतया सदोषता। स्नानाद्यपनेयमलादेश्च सदोषता विवरणमशुद्धिशब्दे। "सर्व्वतीर्थेष्वपि स्नातो ह्यशुद्धः पुनरेव सः" स्मृतिः एतच्च मनःशुद्धिप्रशंसार्थवादः।

**अशुद्धि** स्त्री अभावे न०त०। १शुद्ध्यभावे दोषे न०त०। २शुद्धिशून्ये दुष्टे। तत्राशुद्धिस्तत्प्रतियोगितया शुद्धिश्च निरूपिता हेमाद्रौ श्रा०ख०। ततः सारांशः। अशुद्धिर्नाम कर्त्तृद्रव्यादेः स्पर्शनाद्यनर्हतापादकोदोषविशेषः शुद्धिस्तदीयसंस्कारापादिता तन्निवृत्तिः। शुद्धिमतएव सकलकर्म्मोपयोगयोग्यत्वम् "श्रौतं स्मार्त्तं तथा कर्म कर्त्तव्यमधिकारिणा। शुचिना साधनैः शुद्धैः सम्यक् श्रद्धान्वितेन च" ब्रह्मा०पुरा० उक्तेः। अतो यथाश्रद्धं शुचिना शुचिभिरेव द्रव्यैराचरणीयम्। ते चोभे अपि शास्त्रैकगम्ये। नन्वत्र किं शास्त्रेण लोकव्यवहारप्रसिद्धेः शुद्धाशुद्ध्योः, व्यवहरत्येव हि लोको जुगुप्सितमूत्रपुरीषादिसंसृष्टं द्रव्यमशुद्धमिति प्रक्षालनाद्यपनीतगन्धञ्च शुद्धमिति, सत्यमयं